# शिक्षा–निदेशालयः राष्ट्रिय–राजधानी–क्षेत्रम्, देहली–सर्वकारः

## मध्यावधिः–अभ्यासप्रश्नपत्रम्– 2025-26

## कक्षा-– दशमी संस्कृतम् (कोड-122)

**अवधिः– होरात्रयम्** **सम्पूर्णाङ्काः – 80**

**सामान्यनिर्देशाः-**

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(iii) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(v) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**प्रश्नपत्रस्वरूपम्-**

| | | |
|---|---|---|
| खण्डः- क | अपठितांश – अवबोधनम् | 10 अङ्काः |
| खण्डः- ख | रचनात्मककार्यम् | 15 अङ्काः |
| खण्डः- ग | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| खण्डः- घ | पठित-अवबोधनम् | 30 अङ्काः |

**खण्डः- क**

**अपठितांश – अवबोधनम् 10 अङ्काः**

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 10**

विशिष्टं ज्ञानं विज्ञानं कथ्यते। विज्ञानबलेन संसारे विविधानि चमत्कारपूर्णानि वस्तूनि आविष्कृतानि जातानि। विज्ञानस्य चमत्कारेण अधुना सर्वत्र आश्चर्यजनकानि वस्तूनि दृश्यन्ते। समुद्रे विशालानि जलयानानि निर्भयं गच्छन्ति। विशाले गगने वायुयानेन मानवाः अन्यदेशं शीघ्रं गच्छन्ति। विद्युत्-बलेन शीतकाले उष्णता ग्रीष्मकाले च शैत्यं प्राप्यते। अतिविशालानि उन्नतानि च भवनानि विज्ञानेन निर्मीयन्ते। आधुनिके युगे चलदूरवाणी, दूरदर्शनम्, संगणकं, रेडियो, इन्टरनेट इत्यादीनि सर्वसुलभानि जातानि। सुखोपभोगाय अनेकानि उपकरणानि आविष्कृतानि जातानि येन अस्माकं जीवनं सुलभं जातम्। सम्प्रति विज्ञानं हि अस्माकं मानवसभ्यतायाः मूलं वर्तते।

**अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2x1=2**

(i) विशिष्टं ज्ञानं किं कथ्यते?

(ii) समुद्रे विशालानि जलयानानि कथं गच्छन्ति?

DoE, Delhi

(iii) सम्प्रति अस्माकं मानवसभ्यतायाः मूलम् किं वर्तते?

**ब) पूर्णवाक्येन लिखत (केवलं प्रश्नद्वयम्)** **2x2=4**

(i) संसारे कानि आविष्कृतानि जातानि?

(ii) विद्युत्-बलेन कि–किं प्राप्यते?

(iii) आधुनिके युगे कानि सर्वसुलभानि जातानि?

**इ.) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **1**

**ई.) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)** **3x1=3**

**(i)** 'विशिष्टं ज्ञानं विज्ञानं कथ्यते' अत्र किं क्रियापदम्?

(क) विशिष्टं (ख) कथ्यते (ग) ज्ञानं विज्ञानं

**(ii)** विशालानि जलयानानि अनयोः विशेष्यपदं किम् ?

(क) विशालानि (ख) जलयानानि (ग) किमपि न

**(iii)** 'दुर्लभं' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(क) सुलभम् (ख) सुकरम् (ग) सरलम्

**(iv)**' येन अस्माकं जीवनं सुलभं जातम्। ' अस्मिन् वाक्ये 'अस्माकं' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) विद्युत्-बलाय (ख) मानवेभ्यः (ग) विज्ञानाय

**खण्डः ख - रचनात्मक–कार्यम्** **15 अङ्काः**

**2.** अ **स्वमित्रम् एकादश-कक्षायां संस्कृतं पठितुं प्रेरयितुं मञ्जूषायां प्रदत्तानां पदानां सहायतया एकं पत्रम् उत्तरपुस्तिकायां लिखतु।** **5**

**मञ्जूषा**

| |
|---|
| प्राचीनतमा, भाषा, अभवम्, नमोनमः, मित्रम्, शक्नुमः, वैज्ञानिकी, देवभाषा, मित्रम्, विषयैः, विश्वस्य,समृद्धं , संस्कृतस्य, अनेकासु, पत्रेण, ग्रन्थाः, वाङ्मयम् |

अथवा

आ **भवती विद्योत्तमा अस्ति । भवत्याः विद्यालयात् बहिः अतीव मलिनता प्रसृता अस्ति। एतस्याः मलिनतायाः निवारणाय मञ्जूषायां प्रदत्तानां पदानां सहायतया एकं पत्रम् प्रधानाचार्यां प्रति लिखतु –**

**मञ्जूषा**

| |
|---|
| जनाः, मुख्यद्वारस्य, क्षिपन्ति, वर्षाकाले, जलप्लावनात्, डेंगू–मलेरियादि ज्वरेण, छात्राः, नगर–निगमं, बोधयित्वा, रक्षन्तु, अवकरं, निवेदनं |

DoE, Delhi

**3.प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत–   5x1=5**



**मञ्जूषा**

| |
|---|
| अध्यापिका, छात्राः, चित्रम्, पाठयति, पठन्ति, श्रृण्वन्ति, पृच्छन्ति, आदर्शवाचनम्, उत्पीठिका, पुस्तकम्, मार्जनी बालिकाः, शिक्षिका, व्यजनानि, वातानुकूलनयन्त्रम्, आसन्दाः, उत्पीठिका, तिष्ठन्ति ध्यानेन, श्रृण्वन्ति, स्मितहासं, लेखनी, मन्दं–मन्दं , भित्तौ, हसन्ति |

अथवा

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत –**

"देशस्य सैनिकाः"

**मञ्जूषा-**

| |
|---|
| आरात्रौ, भटाः, देशरक्षां, कुर्वन्ति, आदिवसं, दमनं, सीमाप्रहरी, शत्रूणां, घ्नन्ति, जनाः, वसन्ति, सुखेन, परिवाराः, सुरक्षिताः, भवन्ति, अधिकारिणः, सैनिकाः, आदिशन्ति, परिपालयन्ति |

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत -   5x1=5**

1. मैं गुरुकुल में रहता हूं। I live in the gurukula.

2. मेरे पिताजी क्लर्क है। My father is a cleark .

3. मेरी माता अध्यापिका है। My mother is a teacher.

4. वह सोमवार को मुम्बई जाएगा। He will go to Mumbai on Monday.

5. हम लोग वहाँ कब जाओगे। When will we go there.

**'ग'-खण्ड:**

**अनुप्रयुक्त-व्याकरणम्**

**5.** अ **अधोलिखितेषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा लिखत** **4x1=4**

I. **नास्ति+ उद्यमसमो** बन्धुः कृत्वा यं नावसीदति।

II. सकलैः विद्यार्थिभिः समयस्य **सदुपयोगः** करणीयः।

III. **व्याघ्रोऽपि** सहसा नष्टः गलबद्धश्रृगालकः।

IV. **काचित्+इयमिति** मत्वा व्याघ्रो भयाकुलचित्तो नष्टः।

अथवा

आ **अधोलिखितेषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा लिखत**

I. **इति+ उक्त्वा** धाविता तूर्णं व्याघ्रमारी भयङ्करा।

II. राजासनं **खल्वेतत्**

III. **आर्योऽपि** गुरुचरणवन्दनायाम्।

IV. न **कश्चिदस्मिन्** तपोवने तस्य नाम व्यवहरति।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत-** **4x1=4**

(i) पाषाणीसभ्यतायां **लतातरुगुल्माः** पिष्टाः भवन्ति।

(क) लताश्च तरवश्च गुल्माश्च (ख) लतातरुगुल्म यस्य ते (ग) लतां च ते तरुगुल्माः (घ) लतानां तरुगुल्माः

(ii) कुत्सितवस्तुमिश्रितं भक्ष्यं **समलं** धरातलम्

(क) मलाद् युक्तम् (ख) मलेन सहितम् (ग) मलं युक्तम् (घ) मलाय युक्तम्

(iii) बलीवर्दाभ्यां **क्षेत्रकर्षणं** कुर्वन्नासीत्।

(क) क्षेत्रस्य कर्षणस्य (ख) क्षेत्रस्य कर्षणं (ग) क्षेत्रे कर्षन्ति (घ) क्षेत्रे कर्षणम्

(iv) **पश्चात् व्रजन्ति** सख्याः।

(क) पश्चाति (ख) अनुव्रजन्ति (ग) पश्चात्व्रजन्ति (ग) पश्चव्रजन्ति

DoE, Delhi

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत- 4x1=4**

(i) मामत्तुं कलहायमानौ चपेटया प्रहरन्ती **दृश्+क्त**

(क) दर्शितवान्   (ख) दृष्टम्   (ग) दृष्टा

(ii) **अध्यापिका** पाठं पाठयति।

(ख) अध्यापक + डाप् (ग) अध्याप + इका (ग) अध्यापक + टाप्

(iii) ललितलतानां माला **रमणीया।**

(क) रमण + आ (ख) रमणीय + अलम् (ग) रम्+ अनीयर्

(iv) माला **रमणीया**।

(क) रम + णीया (ख) रमणी + या (ग) रमणीय + टाप्

**8. वाच्यानुसारं उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं विकल्पेन पूरयत। 3x1=3**

(i) प्रियंका – रोहित! i)........ किं पठसि?

(क) त्वम् (ख) अहम् (ग) त्वया

(ii) रोहित: - मया संस्कृतस्य पुस्तकम् ii) …….।

(क) पठ्यते (ख) पठामि (ग) पठसि

(iii) प्रियंका – उत्तमम्! तव iii)……..…….. शुद्धं वर्तते।

(क) श्लोकोच्चारण: (ख) श्लोकोच्चारणम् (ग) श्लोकोच्चारण

**9. प्रदत्तेभ्यः रिक्तस्थानेभ्यः समुचितं कालबोधकशब्दं लिखत - 4x1=4**

(i) अहम् प्रातः 5:30……. जागरणम् करोमि।

(क) पादोनपञ्चवादने   (ख) सपादपञ्चवादने   (ग) सार्धपञ्चवादने

(ii) रमेश: 7:45 ……… अल्पाहारं स्वीकरोति।

(क) सपाद-अष्टवादने   (ख) पादोन-अष्टवादने   (ग) पादोन-सप्तवादने

(iii) माता 9.15 …………. मन्दिरम् गच्छति।

(क) सार्ध- नववादने   (ख) सपाद-नववादने (ग) पादोन-नववादने

(iv) छात्रा: 9:15 ……………… विद्यालयं गच्छति।

(क) पादोननववादने (ख) सार्धनववादने (ग) सपाद नववादने

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - 3x1=3**

(i) ....... अवकाश: भविष्यति।

(ii) त्वम् ........ पठिष्यति?

(iii) ………. त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात्।

DoE, Delhi

**मञ्जूषा**

| |
|---|
| श्वः, कदा, यदि |

**11. अधोलिखितवाक्येषु रेखाङ्कितपदानि अशुद्धानि सन्ति। शुद्धपदं विकल्पेभ्यः चिनुत- 3x1=3**

(i) अहम् क्रीडाक्षेत्रे **क्रीडति।**

(क) क्रीडसि (ख) क्रीडामः (ग) क्रीडामि

(ii) सिंह: **भयङ्करः** वने निवसति।

(क) भयङ्करे (ख) भयङ्कर: (ग) भयङ्करम्

(iii) **सः** भोजनं कुरु।

(क) राम: (ख) अहम् (ग) त्वम्

**घ–खण्डः**

**पठितावबोधनम्**

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5**

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धार्ष्ट्यात् पुत्रौ चपेटया प्रहृत्य जगाद-"कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।" इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्टः।

**I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) 2x½=1**

i.) ग्रामस्य नाम किम् अस्ति?

ii.) बुद्धिमती पुत्रद्वयोपेता कुत्र चलिता?

iii.) राजपुत्रस्य नाम किम् अस्ति?

**II. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2x1=2**

i.) सा पुत्रौ चपेटया प्रहृत्य किम् जगाद?

ii.) राजपुत्रः कुत्र वसति स्म?

iii.) बुद्धिमती कुत्र व्याघ्रं ददर्श?

**III. यथानिर्देशम् उत्तरत - 2x1=2**

DoE, Delhi

i.) ‘ वसति स्म' इत्यस्याः क्रियायाः कर्तृपदं किम्?

ii.) 'मार्गे गहनकानने' अनयोः पदयोः विशेषणं किम् ?

अथवा

आ निर्देशानुसारम् उत्तरत–

i.) 'वने' इत्यस्य पदस्य कः पर्यायः अत्र आगतः ?

ii.) 'केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पितुर्गृहं प्रति चलिता' अत्र 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5**

**वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।**
**कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्॥**
**करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्। शुचिपर्यावरणम् ..**

**I. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) 2x½=1**

i.) किम् भृशं दूषितम् अस्ति?

ii.) धरातलं केन युक्तम् अस्ति?

iii.) भक्ष्यं कीदृशम् अस्ति?

**II. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2x1=2**

i.) कीदृशं जलं नास्ति?

ii.) अस्माभिः किं करणीयम् अस्ति?

iii.) ‘अत्यधिकम्’ इत्यस्य पयार्यपदं श्लोकात् चित्वा लिखत।

**III. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) 2x1=2**

i.) 'निर्मलं जलम्' अनयोः पदयोः विशेषणं किम् ?

ii.) 'निर्मलम्' इत्यस्य पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

अथवा

i.) 'संसारम्' इत्यस्य पदस्य कः पर्यायः अत्र आगतः ?

ii.) **'करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्'** अत्र किं क्रियापदं प्रयुक्तम्

DoE, Delhi

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5**

रामः– एष भवतोः सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि-क्षत्रियकुलपितामहयोः सूर्यचन्द्रयोः को वा भवतोर्वंशस्य कर्त्ता?
लवः– भगवन् सहस्रदीधितिः।
रामः– कथमस्मत्समानाभिजनौ संवृत्तौ ?
विदूषकः– किं द्वयोरप्येकमेव प्रतिवचनम् ?
लवः– भ्रातरावावां सोदर्यौ।
रामः– समरूपः शरीरसन्निवेशः। वयसस्तु न किञ्चिदन्तरम्।
लवः– आवां यमलौ।
रामः– सम्प्रति युज्यते। किं नामधेयम् ?
लवः – आर्यस्य वन्दनायां लव इत्यात्मानं श्रावयामि (कुशं निर्दिश्य) आर्योऽपि गुरुचरणवन्दनायाम् ………………..।
कुशः– अहमपि कुश इत्यात्मानं श्रावयामि।
रामः अहो ! उदात्तरम्यः समुदाचारः । किं नामधेयो भवतोर्गुरुः?
लवः– ननु भगवान् वाल्मीकिः।

**I . एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) 2x½=1**

i.) किं नामधेयो भवतोर्गुरुः?
ii.) लवकुशयोः वंशस्य कः कर्ता?
iii.) यमलयोः बालयोः किं नामधेयम्?

**II. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्) 2x1=2**

i.) रामः सौन्दर्यावलोकजनितेन कौतूहलेन किं पृच्छति?
ii.) किं द्वयोरप्येकमेव प्रतिवचनम्? अस्य उत्तरं लवः किं प्रयच्छति/
iii.) अहो ! उदात्तरम्यः समुदाचारः इति कः कथयति?

**III. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) 2x1=2**

i.) 'आर्यस्य वन्दनायां लव इत्यात्मानं श्रावयामि' वाक्येऽस्मिन् किं क्रियापदम्?
ii.) ' सम्प्रति युज्यते। किं नामधेयम् ' वाक्येऽस्मिन् अव्ययपदं किम् ?
iii.) ' भगवान् वाल्मीकिः ' अनयोः विशेष्यपदं किम्?

**15. रेखाङ्कित-पदानि आधृत्य समुचितं प्रश्ननिर्माणं कुरुत- 4x1=4**

(i) विद्यालये अध्यापका: छात्रान् अध्यापयन्ति।
(ii) आरक्षी चौरेभ्य: त्रायते।

DoE, Delhi

(iii) मानवैः सदा सत्यं वक्तव्यम्।

(iv) इयती वेला सञ्जाता, रामायणगानस्य नियोगः किमर्थं न विधीयते?

**16.** अ **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत - 4x1=4**

**आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।**
**नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति॥**

**अन्वयः-** हि **(i)…………..** शरीरस्थः आलस्यं महान् **(ii)…………** (वर्तते)। (कोऽपि) उद्यमसमः **(iii)…….** नास्ति। यं कृत्वा**(iv)…….** ॥

**मञ्जूषा**

| |
|---|
| बन्धुः, रिपुः, नावसीदति, मनुष्याणां |

**अथवा**

आ **मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**मृगा मृगैः सङ्गमनुव्रजन्ति गावश्च गोभिस्तुरगास्तुरङ्गैः।**
**मूर्खाश्च मूर्खैः सुधियः सुधीभिः समानशीलव्यसनेषु सख्यम्॥**

मृगाः …………**(i)…………** गावः …………**(ii)……………** तुरगाः तुरङ्गैः …………**(iii)…………** मूर्खैः सुधियः सुधीभिः सङ्गम् ……………**(iv)……………**। व्यसनेषु सख्यं समानशीलं भवति।

**मञ्जूषा**

| |
|---|
| गोभिः, अनुव्रजन्ति, मृगैः, मूर्खाः |

**17. अधोलिखित-कथांशं समुचित-क्रमेण लिखत – 8 x½ =4**

(i) तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।

(ii) कश्चित् धूर्तः श्गालः हसन् अवदत्।

(iii) त्वं मानुषादपि बिभेषि।

(iv) व्याघ्रः भयाकुलचित्तो नष्टः।

(v) भवान् कुतः भयात् पलायितः?

DoE, Delhi

(vi) अयमेकस्तावद् एव विभज्य भुज्यताम्।

(vii) कथम् एकैकशः व्याघ्रभक्षणाय कलहं कुरुथः?

(viii) बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत्।

**18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसंगानुकूलम् उचितार्थं चिनुत** **3x1 =3**

(i) **दुर्वहम्** अत्र जीवितं जातं प्रकृतिरव शरणम्।

(क) दुष्टम् (ख) दु:खम् (ग) कठिनम्

(ii) प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो माम् **अत्तुम्** कलहायमानौ चपेटया प्रहरन्ती दृष्टा।।

(क) मारयितुम् (ख) भक्षयितुम् (ग) आगन्तुम्

(iii) कृषक: तं वृषभं **तोदनेन** नुद्यमान: अवर्तत।

DoE, Delhi